श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्री मेल्पत्तूर् नारायणभट्टतिरि विरचितम्

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - ९५

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the Wikner font.

श्रीः

श्रीमते कृष्णाय परब्रह्मणे नमः

श्रीमते रामानुजाय नमः

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - ९५

### *कैवल्यसिद्धिप्रकारवर्णनम्*

आदौ हैरण्यगर्भीं तनुमविकलजीवात्मिकामास्थितस्त्वं
जीवत्वं प्राप्य मायागुणगणखचितो वर्तसे विश्वयोने।
तत्रोद्वृद्धेन सत्त्वेन तु गुणयुगलं भक्तिभावं गतेन
छित्वा सत्त्वं च हित्वा पुनरनुपहितो वर्तिताहे त्वमेव॥ १ ॥

सत्त्वोन्मेषात् कदाचित् खलु विषयरसे दोषबोधेऽपि भूमन्
भूयोऽप्येषु प्रवृत्तिस्सतमसि रजसि प्रोद्धते दुर्निवारा।
चित्तं तावद्गुणाश्च ग्रथितमिह मिथस्तानि सर्वाणि रोद्धुं
तुर्ये त्वय्येकभक्तिश्शरणमिति भवान् हंसरूपी न्यगादीत्॥ २ ॥

सन्ति श्रेयांसि भूयांस्यपि रुचिभिदया कर्मिणां निर्मितानि
क्षुद्रानन्दाश्च सान्ता बहुविधगतयः कृष्ण तेभ्यो भवेयुः।
त्वं चाचख्याथ सख्ये ननु महिततमां श्रेयसां भक्तिमेकां
त्वद्भक्त्यानन्दतुल्यः खलु विषयजुषां सम्मदः केन वा स्यात्॥ ३ ॥

त्वद्भक्त्या तुष्टबुद्धेः सुखमिह चरतो विच्युताशस्य चाशाः
सर्वाः स्युः सौख्यमय्यः सलिलकुहरगस्येव तोयैकमय्यः।
सोऽयं खल्विन्द्रलोकं कमलजभवनं योगसिद्धीश्च हृद्याः
नाकाङ्क्षत्येतदास्तां स्वयमनुपतिते मोक्षसौख्येऽप्यनीहः॥ ४ ॥

त्वद्भक्तो बाध्यमानोऽपि च विषयरसैरिन्द्रियाशान्तिहेतो-
र्भक्त्यैवाक्रम्यमाणैः पुनरपि खलु तैर्दुर्बलैर्नाभिजय्यः।
सप्तार्चिर्दीपितार्चिर्दहति किल यथा भूरिदारुप्रपञ्चं
त्वद्भक्त्योघे तथैव प्रदहति दुरितं दुर्मदः क्वेन्द्रियाणाम्॥ ५ ॥

www.prapatti.com

चित्तार्द्रीभावमुच्चैर्वपुषि च पुलकं हर्षबाष्पं च हित्वा
    चित्तं शुद्ध्येत्कथं वा किमु बहुतपसा विद्यया वीतभक्तेः।
त्वद्गाथास्वादसिद्धाञ्जनसततमरीमृज्यमानोऽयमात्मा
    चक्षुर्वत् तत्त्वसूक्ष्मं भजति न तु तथाभ्यस्तया तर्ककोट्या॥ ६॥

ध्यानं ते शीलयेयं समतनुसुखबद्धासनो नासिकाग्र-
    न्यस्ताक्षः पूरकाद्यैर्जितपवनपथश्चित्तपद्मं त्ववाञ्चम्।
ऊर्ध्वाग्रं भावयित्वा रविविधुशिखिनः संविचिन्त्योपरिष्टात्
    तत्रस्थं भावये त्वां सजलजलधरश्यामलं कोमलाङ्गम्॥ ७॥

आनीलश्लक्ष्णकेशं ज्वलितमकरसत्कुण्डलं मन्दहास-
    स्यन्दार्द्रं कौस्तुभश्रीपरिगतवनमालोरुहाराभिरामम्।
श्रीवत्साङ्कं सुबाहुं मृदुलसदुदरं काञ्चनच्छायचेलं
    चारुस्निग्धोरुमम्भोरुहललितपदं भावयेऽहं भवन्तम्॥ ८॥

सर्वाङ्गेष्वङ्ग रङ्गत्कुतुकमति मुहुर्धारयन्नीश चित्तं
    तत्राप्येकत्र युञ्जे वदनसरसिजे सुन्दरे मन्दहासे।
तत्रालीनं तु चेतः परमसुखचिदद्वैतरूपे वितन्व-
    न्नन्यन्नो चिन्तयेयं मुहुरिति समुपारूढयोगो भवेयम्॥ ९॥

इत्थं त्वद्ध्यानयोगे सति पुनरणिमाद्यष्टसंसिद्धयस्ताः
    दूरश्रुत्यादयोऽपि ह्यहमहमिकया सम्पतेयुर्मुरारे।
त्वत्सम्प्राप्तौ विलम्बावहमखिलमिदं नाद्रिये कामयेऽहं
    त्वामेवानन्दपूर्णं पवनपुरपते पाहि मां सर्वतापात्॥ १०॥

**********

www.prapatti.com